Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका -६३ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि प्रथमायां हस्तानक्षत्रयुक्तः शनिवासरः ०१ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

न निर्मितः केन न दृष्टपूर्वः न श्रूयते हेममयः कुरङ्गः।
तथाऽपि तृष्णा रघुनन्दनस्य विनाशकाले विपरीतबुद्धिः॥

*A golden dear has never been created and no one ever saw such a thing. Yet, Lord Rama got realy to get a golden deer for his beloved wife, Sita. It is clear that in adverse times a man's wisdom deserts him. (5)*

## श्रीमान् वेङ्कटनाथार्यः-३

वेदान्तदेशिक इति प्रथितो वेङ्कटनाथः श्रेष्ठो दार्शनिक इत्यवोचाम। विशिष्टाद्वैत दर्शने तस्य स्थानम् उन्नतम्। भगवद्रामानुजाचार्ये तस्य अत्यधिकं गौरवम् ।तं स यतिपतिरिति कथयति। तत्त्वमुक्ताकलापे तेनेत्थमुक्तम् -

**गाथा ताथागतानां गलति गमनिका कापिली क्वापि लीना**
**क्षीणा काणादवाणी द्रुहिणहरगिरस्सौरभं नारभन्ते ।**
**क्षामा कौमारिलोक्तिस्सदसि गुरुमतं गौरवाद् दूरवान्तं**
**का शङ्का शङ्करादेर्भजति यतिपदौ भद्रवेदीं त्रिवेदीम् ॥**

इति । विशिष्टाद्वैतदर्शने तस्य श्रद्धा च तत्रैवोक्ता -

**नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धैः ।**
**त्रातं सम्यग् यतीन्द्रैरिदमखिलतमः कर्शनं दर्शनं नः॥** इति ।

श्रीवेङ्कटनाथेन (वेदान्तदेशिकेन) सकलेषु तदानीन्तनेषु शास्त्रेषु वैचक्षण्यं लब्धम् । अत एव सर्वेषु विषयेषु तेन प्रबन्धरत्नानि प्राणायिषत। वेदान्ते बहवो ग्रन्थाः । तत्त्वमुक्ताकलापः तत्त्वटीकाः, अधिकरणसारावली इत्यादयः। मीमांसायां सेश्वरमीमांसा । अद्वैतखण्डनाय च शतदूषणी । न्यायाशास्त्रे न्यायसिद्धानञ्जनम् इत्यादि एवं बहुमुखी प्रतिभा अन्यत्र दुर्लभा ।

वेदान्तदेशिकस्य काव्यकृतिषु पादुकासहस्रं नितान्तं सुन्दरं विशिष्टं च । भगवतः श्रीरामस्य हेमभूषिते पादुके भरतेन स्वीकृते, तयोरेव पट्टाभिषेकः संवृत्तः। ते एवाश्रित्य वेदान्तदेशिकेन सहस्रं पद्यानि हृद्यानि न्यबध्यन्त । तत्रैकं पद्यम् अत्रोदाह्रियते यथा -

**रङ्गक्ष्मापतिरत्नपादु भवतीं तुष्टूषतो मे जवात्**
**जृम्भन्तां भवदीयशिञ्जितसुधासन्दोहसन्देहदाः ।**
**श्लाघाघूर्णितचन्द्रशेखरजटाजङ्घालगङ्गापय-**
**स्त्रासादेशविशृङ्खलप्रसरणोत्सिक्ताः स्वयं सूक्तयः ॥** इति ।

**श्रीमान् वेङ्कटनाथार्यः कवितार्किक केसरी ।**
**वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥**

## विश्वविख्यात दसरामहोत्सवः

मैसूरु - विश्वविख्यात दसरा-महोत्सवः अक्टोबरमासस्य प्रथमतमदिनाङ्कादारभ्य १११तम दिनाङ्कपर्यन्तं प्रचलिष्यति । मुख्यमन्त्री सुप्रसिद्धः साहिती चन्नवीरकणविमहाभागः विश्व-विख्यात दसरामहोत्सवस्य उद्घाटनं करिष्यति । कर्णाटक राज्यस्य मुख्यमन्त्री श्रीमान् सिद्धरामय्यस्य उपस्थित्यां कार्यक्रमः प्रचलिष्यति। चामुण्डिशैले प्रातः ११.४०वादने प्रचलिते शुभ धनुर्लग्नेदीपं प्रज्वाल्य दसरामहोत्सवस्य चालनं कृतवान्। मण्डलसचिवा श्री हेच्.सि.महदेवप्पः सांसदः श्री प्रतापसिंहः तथा राज्यस्य शासकाः गण्याः कार्यक्रमे उपस्थिताः इति मण्डलाधिकारि श्री रंदीप्महाभागः पत्रकारान् उद्दिश्य अवदत् ।

## त्रिदिवसेषु प्रतिदिनं षट्सहस्रक्युसेक्स् प्रमाणं जलं प्रवायेत्

नवदिल्ली-भारतसर्वोच्चन्यायालये कावेरीजलविवादचर्चा समभूत्। कर्णाटकराज्य प्रतिनिधिन्यायवादी नारीमन् वादयन् कर्णाटकराज्य-जलाशयेषु वस्तुतः पर्याप्तं जलं नास्ति पातुमेव जलमत्यल्पमस्ति। अतः एतज्जलं कर्णाटकराज्यजनोप योगाय भवति। न्यायालयस्य आदेशं वयं पालयिष्याम एव। परमधुना नवम्बरमासपर्यन्तं-मवकाशः प्रदेयः। अतः सप्तम्बर २० आदेशं परिष्कृत्य जनहितादेशं समादिशतामिति द्विसदस्यन्यायपीठं प्रार्थितवान्। तदा तमिळुनाडु-राज्यस्य प्रतिनिधि न्यायवादिनः वादयन्तः कर्णाटकराज्यजलाशयेषु जलमस्ति। अथापि प्रतिवर्षं पेयजलमिति कारणमुक्त्वा पर्याप्तं जलं नैव विमोचयति। अतः अस्माकं जलमावश्यकम्। अतः जलं विमोचयितुम् कर्णाटकराज्य मादिशतमिति विज्ञापितवन्तः। अस्मिन् समये न्यायधीशौ अटार्निजनरल् न्यायवादिनः अभिप्रायमपृच्छताम् उभयराज्ययोः नेतारौ मिथः चर्चित्वा जलविवादं परिहर्तुमवकाशोऽस्ति वा। केन्द्रसर्वकारः मध्यवर्ती भवति वा इति । तदा अटार्निजनरल् सत्यमुभय राज्यमुख्यमन्त्रिणावाहूय समस्या-परिहाराय केन्द्रप्रशासनं सिद्धमिति अवोचत्। परं किञ्चित् कालावकाशं प्रदेयतम् इति प्रार्थितवान्। तदा न्यायाधीशौ नारीमन्नं समपृच्छत् मिथः सन्धानेन समस्यां परिहर्तुम् उभे राज्ये सिद्धे वेति नारीमन्। झटिति अस्तु इति अङ्गीचकार। तमिळुनाडुन्यायवादिनः अपि अनिवार्येण सूचनामूरीचक्रुः। तदा न्यायाधीशौ उभयराज्यप्रशासकाः मिथः सन्धानेन चर्चाभिः समस्याः परिहरन्तु इति उक्त्वा त्रिदिनपर्यन्तं प्रतिदिनं ६ सहस्रक्युसेक्स् प्रमाणं जलं तमिळुनाडुराज्याय कर्णाटक राज्यं समादिष्टवन्तौ। तदा नारीमन् एतदसाध्यमित्युवाच। किन्तु तस्य वचनं न्यायपीठं नाङ्गीचकार। विचारणां पुनः आगामिनि दिनेषु करिष्याव इति न्यायाधीशा ऊचतुः।

## सीमायाम् उद्विग्ना जनाः

नवदिल्ली-भारतीया सेना पाकिस्थानाक्रान्तकाश्मीरविभागे रात्रौ प्रविश्य उग्रवादिनां दमनम् अकुर्वन्निति हेतोः पाकिस्थानसेवा प्रतीकारं कुर्यादिति सीमाप्रदेशे उद्वेगमयी परिस्थितिरस्ति। सीमायां वसन्तो नागरिकाः गृहाणि परित्यज्य क्षेमयुतानि स्थलानि गन्तुम् आरभन्त । सकलसिद्धतां कृत्वा भारतसेना सन्नद्धा तिष्ठति। इदानीम् उभाभ्यां देशाभ्यां संयमोऽवलम्बनीय इति चीनदेशस्य वरिष्ठा उक्तवन्तः।

## शिमोनपेरेसः निधनमगात्

टेल् अवीव्-इस्रेल्देशस्य अध्यक्ष-चरः नोबेलज्शान्तिप्रशस्तिभाजनः निशमोनपेरेसः बुधवासरे निधनमगात्। त्रिनवतिवर्षवयाः सः पार्श्ववायुरोगेण पीडितः सप्ताहद्वयात् प्राक् रुगणलयं प्रविश्य चिकित्सां स्वीकुर्वन् अवर्तत । मस्तिष्काघातेन अङ्गाङ्गवैफल्येन च मृतः अभवत् । द्विः इस्रेलदेशस्य प्रधानिरूपेण चितः सः पश्चात् देशस्य नवमाध्यक्षरूपेण अधिकारमकरोत्। सः भारतेन सह उत्तमबान्धव्यम् आप्तवान् आसीत्। विश्वसंस्थायां शाश्वतस्थानप्रापणाय सः प्रोत्साहमपि अकरोत् । इस्रेल्प्यालिस्टेन्देशयोर्मध्ये शत-वत्सरेभ्यः स्थितं सङ्घर्षं स्थगयितुं सः प्रायतत। एतयोर्मध्ये प्रथमः ओस्लोशान्तिसहसम्बन्धः अस्य प्रयत्नेन एव स्थापितः। पेरेसस्य निधनाय इस्रल्देशस्य प्रधानी बेञ्जमिन्नेतान्याहुः सन्तापम् असूचयत्। ''पेरेसः दूरदर्शित्वयुतः अवर्तत । सः इस्रेल्देशस्य रक्षणा क्षेत्रस्य साधकः आसीत्'' इति सः दुःखं प्राकटयत् । बराकोबाम ''इस्रेल्देशस्य दीपः अद्य ज्वलनात् मुक्तः। परं तेन दर्शितः आशावादः प्रज्वलन् अस्ति'' इति सः शोकसन्देशं प्रेषितवान्। शुक्रवारे पेरेसस्य अन्त्यक्रियाकार्यं भविष्यति। सन्दर्भेऽस्मिन् बराकोबामादयः विश्वस्तरस्य बहवः गण्याः भागं वक्ष्यन्ति ।

## अतिवृष्टिकृता हानिः

बेङ्गळूरु- हैदराबाद-कर्णाटके अतिवृष्टिकृता हानिः कियतीति सम्प्रति तद्गणितं प्रारब्धम्। ऊहानुसारेण एकसहस्रकोटिरूप्यक परिमिता हानिरभूदिति कथ्यते। कलबुर्गिमण्डलस्य न्यस्तभरः सचिवः डा. शरणप्रकाश पाटीलः भानुवारे सभामायोज्य पत्रिकागोष्ठी-मुद्दिश्य भाषते स्म ।

## दीनदयालु उपाध्यायस्य जन्मशतमानोत्सवः

नवदिल्ली-दीनदयाळु उपाध्यायस्य जन्मशतमानोत्सव। कृत्स्ने हामनेऽस्मिन् समाचरिष्यते इति प्रोच्य प्रधानमन्त्री नरेन्द्रमोदिः तमुत्सवं प्रारब्धवान्। भारतीयजनता पक्षोऽपि तदर्थे कार्यक्रमान् आयोजयिष्यतीति वार्ता।

Dear Subscriber,
Please renew your subscritption if not already done. Trusting you, the paper is sending regularly. Please extend your co-operation.

## सार्कसम्मेलनं न सम्पत्स्यते

नवदिल्ली-नवम्बरमासस्य नवमेदिने इस्लामाबादे सार्क्सम्मेलनं न भविता। भारतं तस्मिन् भागम् अवोढुं यदा निरणयत् तदा तदनु भूतानबांग्लादेश-आफघानिस्तान देशाः अपि तस्मिन् सम्मेलने भागिनः अभवितुं निरणयन्निति कथ्यते। तत्फलतः सार्क् सम्मेलनस्य आयोजको नेपालदेशः इस्लामाबाद् तस्य आयोजनमकर्तुं निर्णयं कृतवानिति वार्ता ।

## भयोत्पादकानां प्रशिक्षणशिबिराणि पिदघताम्

न्यूयार्क्नगरम्-पाकिस्ताने यानस्ति सन्ति भयोत्पादकानां प्रशिक्षण शिबिराणि तानि सर्वाणि शीघ्रमेव पिधीन्तामिति अमेरिकस्य गृह-सचिवालयस्य अधिवक्ता मार्क्टोनरः संदिष्टवानिति वार्ता।

## मोय्लिवर्यस्य नेतृत्वम्

* नवदिल्ली - केन्द्रसर्वकारस्य सामान्यायव्ययपत्रके रेल्यानाय व्ययपत्रकम् अन्तर्भावयितुं प्रयत्नः क्रियमाणोऽस्ति। कांग्रेस्पक्षस्य वीरप्प मोय्लिः तदर्थे रचितायाः समितेरध्यक्षो भविष्यतीति कथ्यते । सा समितिः रेल्यानस्य संशोधनाय स्वशंसनम् अर्पयति इति वार्ता ।

## आदिचुञ्चगिरिक्षेत्रे शरन्नवरात्रोत्सवः

आदिचुञ्चनगिरि-मासस्यास्य प्रथम दिनाङ्कादारभ्य एकादशतमदिनपर्यन्तं शरन्नवरात्रोत्सवः प्रचलिष्यति इति प्रकटनं सूचयति।